यम् २ इतिश्रुत्वापिसमुनिःसर्वराज्ञेन्यवेदयत् ततःस्कंदोनिरपराधांसराजासुनयेददौ १० समुनिस्कंदयारेमेरा
जपुत्र्यानियोग्यया एकदाहमुनिःपुत्रंरमंतमातुरंतिके ११ पुत्रगच्छवनेशीघ्रंकुशपुष्पार्थमुद्यतः गतःपुत्रोवनेशी-
घ्रंदृष्वासोपिशिवालयम् १२ तपसेकृतसंकल्पःषण्मासंतत्रसंस्थितः अथमतुततःप्राप्तोगृहीत्वासोसमिन्
कुशान् १३ पितारोषेणसंतप्तःपंचत्वगच्छपुत्रक पितुस्तुशापमात्रेणविपत्तिमगमत्तदा १४ ततःसायोगिनीभा
र्यामृतपुत्रेनिदुःखिता मृतंपुत्रसमादायगंगातीरंगताभवत् १५ मृतपुत्रसमासाद्यकृत्वामूर्तिंजलाश्रये भ
गवत्याः शरत्कालेश्वाश्विनेप्रतिपद्दिने १६ निराहारावनिःशाकाशक्तिध्यानपरायणा एकभक्तियुतासाचरात्रयो-
नवतागताः १७ पापक्षयस्यसंयोगात्प्रसन्नाशक्तिरब्रवीत् वरंवरयभद्रंतेतवयन्मनसेप्सितम् १८ जनन्युवा
च मृतंपुत्रप्रदेत्याशुप्रसन्नाभवचिताक्षणात् शक्तिरुवाच संजीवयाम्यहंपुत्रंस्कंधासिक्तमहीतले १९
समोयंचपितुः शापोब्रह्मशापोदुरत्ययः संप्रीणयत्स्वभर्तारंब्रह्मशापविमोचनात् २० पश्चाच्छक्त्यास्कंधासिक्तो
मृतोसौजीवितोभवत् नवरात्रमुपोषात्साकृतकार्योभवत्सती २१ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवा
दे श्राश्विनमासमाहात्म्येनवरात्रमहिमवर्णननामसप्तदशोऽध्यायः १७ ७ पृथुरुवाच अन्यत्
कथयमेब्रह्मन्व्रतंबुद्धिप्रदंशुभम् यत्कृत्वालभ्यतेबुद्धिरिहामुत्रसुखप्रदां १ नारदउवाच ईषमासिसि
तेपक्षेद्वितीयायानुपोत्तम प्रातरुत्थायविधिवत्स्नायाच्छीतेनवारिणा २ अत्युत्तमनदीस्नानंतडागेमध्यमस्मृतम्
अधमंतुगृहेस्नानंनिषिद्धंचोष्णवारिणा ३ प्रातर्विधिंविधायादौमध्यान्हेजलसन्निधौ सरस्वत्याःपरांदिव्यामू
र्तिंचसिकतोद्भवाम् ४ चतुर्भुजांसावयवांमयूरवरवाहनम् पूजयेत्सरयाभक्त्याषोडशैरुपचारकैः ५ मितपुन- १५
ष्पोपहारैश्चमितवस्त्राक्षतादिभिः नैवेद्यंपायसंकृत्वादशयेज्जगदंबिकाम् ६ समाप्यप्रार्थयेच्छक्तिं चिच्छक्तिंस

र्वकामदाम् सद्बुद्धिंदेहिसत्पात्रंसत्कांतांसत्प्रजांयशः ७ सच्छीलंसद्धनंचायुःसद्विद्यांसत्समागमः निवेद्यपूजनं-
तस्यद्विजंसंपूजयेत्ततः ८ सक्तवर्णक्षीरपात्रंछादितंश्वेतवाससा द्विजवर्योपदातव्यंस्वशक्त्यादक्षिणान्वितम्
९ ननःकथांसमाकर्ण्यसरस्वत्याश्चसन्निधौ नमस्कृत्यजगद्धात्रींप्रवाहेतांविसर्जयेत् १० आहूतासिमयाभद्रे
पूजितासियथाविधि कुरुमेव्रतसाफल्यंगम्यतांनिजमंदिरम् ११ दंपत्यासहराजेंद्रत्र्यंभीर्यात्सायसंव्रती
सरित्तीरेप्रकर्तव्यंव्रतसद्बुद्धिदायकम् १२ देवालयेगवांगोष्ठेग्रहेचाश्वत्थसन्निधौ व्रतनानेनसद्बुद्धिःप्राप्यते-
नात्रसंशयः १३ अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् माहिष्मत्यांपुरेराजाचंद्रसेनेतिविश्रुतः १४ कुबेर
इवसंपन्नःसर्वशास्त्रविशारदः क्षमदानामभार्यासीद्भर्तृवाक्यपरायणा १५ चंद्रसेनोपिधर्मात्मासर्वधर्मपरा
यणः नयापिनाभवत्पुत्रःपुत्रार्थेयत्नमाचरं १६ राजानंजरठंदृष्ट्वा क्षमदाचिंतयान्विता दासीदासांश्चकथयन्
कथंपुत्रोभविष्यति १७ पुंश्चलीभिश्चजारेभ्यपुत्रार्थे सुमदांतदा बोधयामासकर्जारिण्यःक्षमदारहसिस्थिता
१८ नराज्ञोलप्स्यसेपुत्रंवृद्धस्यानीवभामिनी तरुणीरूपसंपन्नातरुणाल्लप्स्यसेसुतम् १९ अतीवबलसंपन्नो-
भविष्यतिसुतस्तव जठराज्जरठोभावीगदार्तोच्चगदीभवेत् २० एतदर्थंत्वयाकार्यंतरुणासूत्रसंग्रहः अपुत्रस्य
सुखंनास्तिइहलोकेपरत्रच २१ इतिश्रुत्वावचस्तासांसुमदाविस्मयान्विता महत्पापमयाकार्यमनर्थजननिंदि
तम् २२ यास्यामिनरकान्घोरान्कथंकार्यंहितन्मया स्त्रियऊचुः भर्तृदेहेन्यदेहेवाकोभेदस्तुत्रदृश्यते २३
वृथाभीतिःकृतालोकेनदोषोजारकर्मणि सततंसेव्यभिचारोक्तोरोगार्तेनयथौषधम् २४ स्वकार्यंसाधयेत्प्रा-
ज्ञोयेनकेनापिकर्मणा तासांवचनमाकर्ण्यक्षमदात्तृष्टमानसा २५ तरुणंरूपसंपन्नंबलवंतंव्यलोकयत् तेन-
स्वसेविनारेमेनिःशंकंक्षमदातदा २६ तरुणीनांजारिणीनांनटपाखंडदासिनाम् दुष्टानांवीर्यहीनानांरहस्या

सामनर्थदः २७ दधारगर्भंसुमदाकालेनात्मीयसाततः अनन्यंचदृशास्कंभुचंद्रसेनोनिरीस्यतम् २८ पुत्रंप्रा
सूतस्कमदाजातकर्माकरोन्नृपः ततोवर्धननामास्यद्वादशाहेद्विजोरितम् २९ अष्टमेहायनेतस्यव्रतबंधंचकार-
ह अनेकविद्याभ्यासेननिपुणःसबभूवह ३० जातेविवाहेकालेनतरुणोवर्द्धनोभवत् मातरंपितरंबध्वानिग
डेस्थापयन्मुदा ३१ निगडेयोजयामासमान्यान्दृष्ट्वाश्वमोक्षिणः शरण्यान्पालयामासस्वयंराजाबभूवह ३२
वेदशास्त्रपुराणानिद्विजान्निंदयतःसदा परस्त्रियंपरधनंदृष्ट्वाहरतितत्क्षणात् ३३ आदंड्यान्दंडयभित्व
दंड्यांश्चैवाप्यदंडयन् चकारवर्धनोधर्मंदशग्रामपुरेवने ३४ तद्भयात्सकलालोकास्त्यक्त्वासर्वंगृहादिकम् कथ
यामासकृत्तांतंदेवनागिरसंमुनिम् ३५ आश्रमस्थंसुखासीनंध्यानस्थंशिष्यसंयुतम् नत्वाप्राचुर्मुनिवरंवि-
नयानतकंधराः ३६ त्राहित्राहिऋषेस्माकंराज्ञासंपीडिताभृशम् सर्वेविहायतत्रस्थंवयंयातानिवेदितुम् ३७
केनव्रतेनदानेनतपसावान्यथाकृपांकृत्वावदमुनेसम्यग्राजाभविष्यति ३८ अंगिराउवाच बुद्धि
मद्यदिव्रतंकृतंराज्ञायदाशुभम् बुद्धिर्भवतिसर्वेषामुपकारीनसंशयः ३९ जनाऊचुः स्त्रैणोन्मत्तोमहा
क्रोधीकथमाचरतिव्रतम् वयमेवकरिष्यामोराज्ञेसद्बुद्धिकारणात् ४० ततोनिवेदिततेभ्योव्रतंसद्बुद्धिदाय-
कम् तेपिचक्रुर्यथोद्दिष्टंश्रीमदांगिरसेनयत् ४१ व्रतस्यास्यप्रभावेनसद्बुद्धिंप्रापभूपतिः मातरंपितरंसर्वांश्चि
गडान्मुक्त्वांस्ततः ४२ सर्वान्जनानूसमाहूयपालयामासपुत्रवत् सद्बुद्धिव्रतचक्रेस्वयमेवजनेरितम् ४३
तेनपुण्येनसकलान्भुक्त्वाभोगान्यथेप्सितान् जगामचंद्रभुवनंतत्रस्थःसुखमाप्तवान् ४४ ब्राह्मणैःक्षत्रियैर्वै
श्यैःस्त्रीभिःशूद्रैश्चभक्तितः सकामैर्वापिनिष्कामैःकार्यंतत्तत्फलेप्सुभिः ४५ इतिश्रीभविष्योत्तरपुराणे
पृथुनारदसंवादे आश्विनमासमाहात्म्येसद्बुद्धिव्रतकथनंनामाष्टादशोऽध्यायः १८ ७ ५

सूतउवाच मासेऽश्विनेसितेपक्षेचतुर्थ्यांमाचरद्धृतम् महागणपतेःपूजाकर्तव्याविघ्नभीरुभिः १ स्व-
र्णादिधातुभिःकार्यामूर्तिर्गणपतेःशुभा कृत्वामानविधिमर्त्यःप्रार्थयेच्चवनस्पतिम् २ अपामार्गनमस्तेस्तुसमस्त
व्रतसिद्धये छिन्धिशीघ्रंवात्वंशुद्धिंदेहिमेव्रतकर्मणि ३ एकविंशतिकाष्ठानिगृहीत्वास्तुतिपूर्वकम् धावयित्वा
स्वदंतांश्चस्नानंकृत्वासमंत्रकम् ४ मध्यान्हेपूजयेद्भक्त्यादेवंविघ्नहरंप्रभुम् पंचामृतैःस्नापयित्वासिद्धिबुद्धिसम
न्वितम् ५ एकविंशतिपुष्पैश्चपत्रैश्चविविधैःशुभैः अंगपूजानामपूजाकर्तव्यापरमात्मनः ६ धूपदीपादिकंकृ
त्वानैवेद्यदर्शयेत्ततः अनेकरससंपन्नंभक्ष्यभोज्यसमन्वितम् ७ शाकोपशाकसंयुक्तंगोघृतेनसमन्वितम् गृहा
णदेवदेवेशसर्वकामप्रदोभव ८ हरितान्श्वेतवर्णान्वापंचत्रिपत्रसंयुतान् दूर्वांकुरान्मयादत्तान्गृहाणगणनायक ९
त्रीस्त्रीन्दूर्वांकुरान्गृह्यस्यर्पयेत्परमेश्वरं चिंतामणिर्विघ्नराजोगणनाथोऽघनाशनः १० सर्वविद्याधिपः
शांतोभक्तकामदुघःप्रभुः भक्तिप्रियोभक्तिगम्योभक्ताभीष्टफलप्रदः ११ विघ्नराजोगणपतिर्गणाध्यक्षोगणेः
श्वरः भालचंद्रोधूमकेतुःकश्यपोनंदकृद्विभुः १२ व्याहृत्यैतानिनामानिगणेशानिप्रियाणिच एकैकनाम्नादे
वेशत्रीस्त्रीन्दूर्वासमर्पयेत् १३ दक्षिणाफलतांबूलंमंत्रपुष्पनिवेदयेत् ततःप्रपूजयेद्विप्रंवाणंदद्याद्विजन्मने
१४ एकविंशतिपक्वान्नयुतंवंशस्यभाजनम् सतांबूलरक्तवस्त्राच्छादितंस्वकृतंशुभम् १५ सुवर्णदक्षिणाद
त्वाव्रतंसंपूर्णतांव्रजेत् युग्मंसपूज्यस्वाद्यैर्भोजयेद्भक्षयेत्स्वयम् १६ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैस्त्रीभिःकु
मारिभिः व्रतकार्यप्रयत्नेनसंपूर्णफलसिद्धये १७ उत्तमाधममध्यानिनृणांकार्याणियानिच तानिसर्वाणिसिद्ध्य
न्तिव्रतेनानेननिश्चितम् १८ अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् यत्कृत्वासर्वविघ्नेभ्यदूरादेवपलायते १९
अरण्यवासेमहतिसंकटेसमुपस्थिते नत्वायुधिष्ठिरःकृष्णंप्रोवाचविनयान्वितः २० युधिष्ठिरउवाच केन

दोषेणदेवैरानफलंतिमनोरथाः प्रतिकार्येषुविघ्नानिकार्यहानिःपुनःपुनः २१ एतन्मेविस्तरंब्रूहिसर्वलोकहिता-
य च श्रीकृष्णउवाच परान्दास्यतियेदुःखमात्मनःसुखलिप्सया २२ परकार्येषुविघ्नानियेकुर्वंतिनराधमाः
तेषांबहुतरंदुःखंफलंतिमनोरथाः २३ युधिष्ठिरउवाच तद्दोषपरिहारार्थंव्रतंकथयमेधुना २४ इति
श्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येगणेशव्रतकथनंनामएकोनविंशोऽध्यायः १९ ७
श्रीकृष्णउवाच माहिष्मत्यांपुराराजावीरबाहुर्नराधिपः पुत्रपौत्रसमायुक्तः सर्वसंपत्समन्वितः १ कौशिक्या
सीत्प्रियास्यसर्वलक्षणसंयुता तथापिनाभवत्सौख्यंसदाप्राप्तमनोरथः २ सर्वकर्मसुविघ्नानिनचासोद्य
राऽत्तमम् एवंपुनःपुनःपश्यन्नयशःकार्यहानिकृत् ३ किंकर्तव्यंक्वगंतव्यंयेनदोषोलयंव्रजेत् प्रष्टुंचमहदा
रण्यंजगामनृपसत्तम ४ भ्रमन्भ्रमन्ददर्शाथत्यरण्यंजनवर्जितम् तत्रापश्यद्द्विजवरंभृगुज्ञानविदांवरम् ५
साष्टांगंप्रणिपत्याथतुष्णींतस्थौचतत्पुरः ध्यानंविसृज्याथमुनिरुवाचविनयान्वितम् ६ कोसित्वंचकुतोया-
तोनामकिंतेवदस्वमे किमर्थमिहचायातः किंतेदुःखंनिवेदय ७ राजोवाच माहिष्मतीनामपुरीतत्र-
स्थोहंनराधिपः वीरबाहुरितिनामसर्वसंपत्समन्वितः ८ सुहृत्पुत्रकलत्राप्तमंत्रीगणयुतोपिमे नसौख्यंनच-
मेहेतुःपूर्णोभवतुकश्चन ९ विघ्नानिसर्वकार्येषुसदाभग्नामनोरथाः यदिच्छामिनतल्लप्स्येतेनाहंदुःखितोमुने
१० एकाकीसकलान्हित्वाआगतोहत्वदंतिकं तत्रैतन्मयाप्राप्तराज्यंनिहतकंटकम् ११ सतिराज्येतिथि
फलोहेतुर्मेप्रत्यहंमुने कृपांकृत्वात्वनाथस्यतत्सर्वंकथयस्वमे १२ भृगुरुवाच त्वमासीःपूर्वजन्मनिब्रा
राजापुरजनः धनवान्सर्वसंपन्नःपाखंडिजनसंयुतः १३ सदाकुद्रजनस्नेहीत्यज्ञानजनसंवृतः वाक्यंशृणो
तिसर्वेषांयथावदतितत्तदा १४ पराधीनपरस्नेणःसदास्त्रीजनसंवृतः उद्धृतंचनाम्नावेपुराधास्तेभवत्पुरा

१५ सदाक्रूरमतिर्दुष्टःपरदाररतःशठः अत्यंतकृपणोधूर्तोधनार्थीधनतत्परः १६ धर्माधिकरणेराज्ञानियुक्तो
जनवंचकः अर्धहरतिविप्रेभ्यःस्वयदत्तापहारकः १७ पाखंडिनटखंडेभ्योदत्वादानानितद्धरन् राज्ञेप्रतिग्रहपूर्वद
त्वादास्येततोपरान् १८ एवमासीत्पुरोधास्तेयद्विजद्रव्यहारकः नत्वयात्यर्थिनेदत्तंश्रोत्रियायकुटुंबिने १९ हि
जवर्यायनोदत्तंविदुषेनिस्पृहायच तत्तथैवत्वकर्तव्यंकथितंचोद्धतेनयत् २० तेनदोषेणमहतात्र्यसत्प्रतिग्रहेण
च असद्धनव्ययेनैवत्यसदाचरणेनच २१ प्राप्तोसिपरमंदुःखंविफलस्तमनोरथः राज्येपिसतितंदुःखंसभा-
नपूर्वकर्मणा २२ कृतंकर्मचभोक्तव्यंनरैरावश्यकंबुधैः विघ्नानिस्करवहानिश्वसद्यःप्राप्तमनोरथः २३ एतस्य
कारणंप्रोक्तंशृणुराज्यस्यकारणम् कस्मिंश्चित्समयेराजन्मृगयार्थंगतोभयान् २४ हत्वामृगान्वनचरान्मध्यान्हे
जलसन्निधौ अन्यान्हत्वामृगगणास्तांस्तान्निपुर्गृहंप्रति २५ बभूवमृगयासक्तःपरिवारगणैर्युतः अस्तंगतेदि
नमणौतत्रावस्थितवान्वने २६ ब्राह्मेमुहूर्तेचोत्थायमृगान्हंतुंसमुद्यतः तदैकंदृष्टवान्राजाधावंतंपीवरंमृगम् २७
ययौतत्पृष्ठतोराजाविहायाश्वंचनांतरम् मृगस्तुतद्भयाद्गच्छन्दूरंवातेपपातह २८ तंधर्तुंपृष्ठतोराजासलिलं
प्रविवेशह अगाधसलिलेतस्मिन्नापश्यत्तंमृगंनृपः २९ मासेस्मिनेसितेपक्षेचतुर्थ्यामरुणोदये पश्यन्पश्यन्मृग
यातोनिर्जगामबहिस्ततः ३० आर्द्रवस्त्रोहिमेनातस्तत्रैकंदृष्टवान्द्विजम् परापकारिणंश्रेष्ठमिषस्नानार्थमा
गतम् ३१ तंगत्वायाचयेहस्त्रंविद्विएकाकिनंनृप सोपितस्मैददौचस्त्रमुपविष्टस्तदंतिके ३२ ततःसूर्योदयो
जातोराजातस्मैद्विजन्मने प्रार्थयामासपरयाभक्त्या तंचांगुलीयकंमुद्रांददौनमस्कृत्यसेनांदृष्ट्वागमद्गृ-
हम् इषस्नानेनसत्पात्रेस्वर्णदानेनतेनच ३४ संप्राप्तपरमश्रेष्ठराज्यंनिहतकंटकम् इतितेकथितःसर्ववृत्तांतः
पूर्वसंभवः ३५ अधुनाकथयिष्यामित्युपायःस्करवलब्धये इषमासेप्रकर्तव्यस्नानंचानुदिनंरवौ ३६ अततत्र

प्रकर्तव्यंसर्वविघ्नविनाशनम् शुक्लपक्षेचतुर्थ्यांतुईषमासिचरेद्व्रतम् ३७ सर्वविघ्नविनिर्मुक्तःसफलास्युर्मनोरथाः
सगरेणककुत्स्थेनजयंतेनमनीषिणा ३८ कृतंविघ्नविनाशार्थमन्यैराजर्षिभिःपुरा त्वमेवकुरुराजेंद्रसर्वान्कामान्
वाप्स्यसि ३९ प्राप्तेचाश्वयुजेमासिवीरबाहुर्नृपोत्तमः यथोपदिष्टंभृगुणाचक्रेतत्सन्निधौतनः ४० जगामस्वगृह
राजाप्राप्तवान्स्वमनेप्सितम् ४१ ॰ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येविंशोऽध्या
यः २० ७ नारदउवाच नवरात्रेप्रवृत्तेतुमहादेव्यामहोत्सवे शरद्यश्वयुजीब्रह्मन्पंचम्यांचविशेः
षतः १ उपांगललितादेव्याव्रतंचैलोक्यदुर्लभम् तदेतत्कथयिष्यामिसर्वलोकहितायते २ सर्वेऋषिगणाःपूर्व-
जग्मुःकैलासपर्वतम् स्कंदंतत्रामहात्मानमिदमूचुर्महर्षयः ३ ऋषयऊचुः महासेनमहाबाहोनंदनानंद
कम् आख्यातानिस्कपुण्यानिश्रुतानित्वत्प्रसादतः ४ कथात्वद्वदनांभोजप्रसूतांभूरिभूतयः नतृप्तिमधिगच्छा
मःपायंपायंसुधानिधिम् ५ शुश्रूषवोवयंदेव्याव्रतंतत्कथयस्वनः मनोभिलषितार्थानांसिद्धयस्मिन्सतिभवेत् ६
स्कंदउवाच साधुपृष्टमहादेव्यामाहात्म्यंमुनिपुंगवा वक्ष्यिसर्वंविधानेनतच्छृणध्वंजगद्धितम् ७ भृगुक्षेत्रेषु
राविप्राविप्रोभूद्गौतमाभिधः श्रुतिस्मृतिपुराणज्ञोधनीचबहुबांधवः ८ अनपत्यस्यतस्याथजज्ञातेजरतःसुतौ
श्रीपतिर्गोपतिश्चैवनामनीत्यकरोत्तयोः ९ अचिरेणैवकालेनसपत्नत्वमगाद्द्विजः तौतुबालौधनबंधून्हित्वातद्व
१० प्रविवेशदहन्सर्वान्स्वर्यातुंपतिनासह अथतेबांधवाःसर्वेहाकष्टमितिदुःखिताः समेत्यदुः
खिताश्चक्रुस्तत्क्रियांपारलौकिकीम् ११ अथसुरव्यः सपत्नोभूद्भ्रातासज्गृहधनम् आयुष्मतोसुतोगेहंनिजमा
नयदुर्मनाः १२ नास्तिचक्रधनंसर्वंताभ्यांकिंचिन्नवेददौ ततोमौंजीधरौबालौबंधुभिःकथितंवस्क १३ यथाच
तुःपितुर्द्रव्यंदेहिनोदेयमित्युत सतावूचेननद्रव्यंयुवयोःकेनभाषितम् १४ निर्गच्छतामगृहादित्यादिपुरुषव

हु तौतद्वचोभिर्निर्विण्णोबालोश्रीपतिगोपती १५ बभाषातेमियःकष्टंधिगहोपितृहीनताम् यावोदेशांत्रंयत्रस्थज
नोनास्तिकिंचन १६ अनाभ्यासेवस्कस्टदौजग्मतुर्दिशमुत्तराम् भिक्षाचारौबहून्देशान्वनानिसरितोगिरीन्
१७ समतिक्रम्ययतुर्विशालांनामतःपुरीम् कासारमीक्षाचक्रातेततोस्याःसन्निधौशुभम् १८ पुंडरीकव
नाकीर्णरक्तसंध्यासुशोभितम् संध्याभ्रभूषितंचारुयथातारांकितंनभः १९ श्रांतौपथिगतौबालौक्षणंविश्राम्य
तत्तटे आचम्यशिशिरंतोयंसस्नतुश्चयथाविधि २० गताध्वखेदौविप्राग्र्यौपुरमाविशतांततः वीथीचतुष्पथ
युतंचात्रगोपुरमंडितम् २१ देवतागारुचिरसौधराजीविराजितम् नानावीथीरतिक्रम्यविप्रावासमवापतुः २२
कथंचित्त्वर्थविप्रस्यक्षुत्पिपासार्दितौगृहम् ययतुर्वेदिकायांतावुपविष्टौश्रमातुरौ २३ स्वामीततःस्वगेहस्यविवे
कइतिविश्रुतः आगतौवैश्वदेवांतेसददर्शातिथिद्विजौ २४ अनापृच्छ्यश्रुतशीलंतथाचकुलनामनी ऋषिवसू
जयामासस्मरन्धर्मंसनातनम् २५ अथतौपूजयामासत्याह्लंसहचाबुना तौब्रह्मचारिणौविप्रौतोसपर्यांवि
लोक्यच २६ देशबंधुपरित्यागखेदमुच्छ्वावभूवतुः अथापृच्छत्कृपालुस्तौकौयुवांकुतआगतौ २७ किमर्थम
त्यवयसौनिर्गतौस्वगृहादिति तद्विवेकस्यवचनमाकर्ण्यश्रीपतिस्तदा २८ आनुपूर्व्येणसकलवृत्तांतंसमभा
षत श्रीपतिरुवाच पितृहीनाविनिज्ञात्वात्यक्तोबंधुजनेनच २९ आश्वास्यस्थापयामासस्वगृहेबहुवा-
सरम् प्रचक्रमेततःशिष्यैःसहाध्यायइतिश्रुतम् ३० बभूवतुश्चतौबालौगुरुशुश्रूषणेरतौ गुरोर्गृहेनिवसतो
रागतानिर्मलाशरत् ३१ फुल्लपद्मविशालाक्षीप्रसन्नेंदुशुभानना तस्यांसशिष्यमाचार्यंचरंतंव्रतमुत्तमम् ३२
पप्रच्छतुर्भोकिमिदमावाभ्यामितिकथ्यताम् ताभ्यामेवंकृतप्रश्नोविवेक इदमब्रवीत् ३३ इतिश्रीभवि-
ष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येउपांगललितोपाख्यानेएकविंशोऽध्यायः २१ ६२

गुरुरुवाच उपांगललितादेव्याव्रतंदेवर्षिपूजितम् सर्वकार्यकरंनृणामस्माभिःसमुपास्यते १ विद्याकामेनक र्तव्यतथैवधनकाम्यया सुतार्थिनाचकर्तव्यंव्रतमेतदुदीरितम् २ नारदउवाच विद्याकामौततोबालौव्रतमा चरतुद्विजौ भक्तितोगुर्वनुज्ञातोयथाशक्तियथाविधि ३ तौनत्वसादात्सकलशास्त्रवेदानवापतुः अन्यस्मिन्हायनेभ क्त्याविवाहार्थंचचक्रतुः ४ श्रीपतिर्गोपतिश्चैवव्रतमेतत्तपोधनाः अचिरेणार्थसंप्राप्तेमासिमाघेतयोर्गुरुः ५ स्वावि वाहोचितांकन्यानाम्नागुणवतीमिति विनीतायश्रुतवतेयूनेश्रीपतयेतदा ६ विचार्यबांधवैःसार्धंददौपुण्येनुवासरे पारिबर्हंबहुतदाददौदुहितृवत्सलः ७ विवेकोपिक्षुद्लभेसानुरागोविलोक्यतौ अन्याब्दंतुपुनश्चैतद्व्रतंदेव्याःप्रचक्रतुः ८ भातरौचनिजंदेशमिच्छंतौचधनादिकम् अथान्येह्निकस्मिंश्चित्तावुपाध्यायमूचतुः ९ स्वामिन्युष्मत्प्रसादेन लब्ध्वाविद्यांतथावस्तु अनुज्ञांदेहिगच्छामोनिजंदेशमितःपुनः १० इत्याकर्ण्यसमालोच्यशुभवासरमादृतः स्वयंप्रेष यितुंविप्रस्तौताकन्याचनियोयौ ११ अथदेव्याःप्रसादेनपितृव्यस्यनयोःकिल अनशनेमनिजानागतौश्रीपतिगोपती १२ निर्गतौकगतौदेशंवसंतौकेनचिंतयन् लोकेनिंदांमाकुर्यान्नयोरन्वेषणेमतिम् १३ ददृशुस्तौततःसोपिविनिर्या यनिजान्पुरान् तद्वनगरग्रामोविवेकारव्योद्विजोत्तमः १४ सशिष्यःकन्यकासार्द्धंक्रममार्गेशनैःशनैः ततस्तेषां संप्रजानिसगमोद्विजपुंगवः १५ विदांचकारतौरुच्छ्रान्मध्येवयसिसंस्थितौ भवतामेवसामीप्यमागंतुप्रास्थितांव यम् १६ इतिश्रुत्वाविवेकस्यवचनंमुदितोभवत् आलिलिंग्यततोबालौमूर्ध्निजिघ्रन्पुनःपुनः १७ पादौनतागुः णवतीविवेकेनविरूपिता आशीर्वादैर्बहुविधैस्तांसुषामप्ययोजयत् १८ अथतेमुदिताःसर्वेभृगुक्षेत्रंययुस्तदा ज्ञातिभिःसहसंगम्यशृण्वद्भिस्तद्विचेष्टितम् १९ तौपितृव्यगृहेकाश्चिद्दुःखितौदिवसांस्तदा लब्धवंतौधनंगेहंनि- जंश्रीपतिगोपती २० मुदितस्तदनुज्ञातोविवेकस्वापुरीययौ श्रीपतिर्गोपतेश्चक्रेविवाहमचिरात्तदा २१ तावकचेत

सौख्यंचकतुर्हिजतर्पणम् श्रीपतिःश्रद्धयायुक्तःकनीयान्व्ययशंकितः २२ विचार्यभार्ययासार्द्धंविभक्तःश्रीपतेरभूत्
संभोगान्विविधान्भुंजन्प्रेमतोधनसंपदा नदेव्याराधनंचक्रेगोपतिर्धनलंपटः केनचित्त्वथकालेननष्टंतस्यधनंधनम्
२४ अकिंचनोगतश्चिंतांभार्ययाश्वासितस्तथा तवभ्रातृग्रहेविप्राभुंजंतेबहवस्तदा २५ गच्छचानुदिनंचांतेतत्रभो-
क्तुंस्फुटंस्थितम् एवंभोजनवेलायामागत्यागत्यतद्गृहम् २६ भुंजन्भुंजन्भिजगृहंगतोसौबहुवासरम् कदाचिदागतो
यावद्गोपतिर्भार्ययासह २७ उपविष्टेषुविप्रेषुभोक्तुमाविंदतासनम् अथान्नराशेःसामीप्यंभोजनायक्षुधातुरम् २८
उपविष्टंगोपतौतुभार्ययासनिवारितः अस्मादुच्छिष्टवेतूर्णंत्वमुच्छिष्टंकरिष्यसि २९ तिष्ठतिष्ठक्षणंचैकंपश्चाद्भुंक्ष्वे-
तिचाब्रवीत् गोपतिर्भार्ययासाकंततोविमनसावुभौ ३० अभुक्तेवतुनिष्क्रांतोययतुर्निजमंदिरम् ततःसजायोपवा
चनिजमार्गंविचिंतयन् ३१ भ्रात्रासममयाचित्तंसंविभक्तमपिप्रिये निर्धनोहंधनीजायान्भ्रूयतामत्रकारणम् ३२
पुरावाभ्यांगुरुकुलेव्रतमाचरितंशुभम् उपांगललितादेव्याविद्यादिसकलंवरम् ३३ प्राप्तंमयातत्सकलंपरित्यक्तंप्र-
मादतः तत्परित्यक्तवेश्रीपतिनानेस्माच्छ्रीस्तंस्फुसेवने ३४ गतमयातत्यागेनयत्प्राप्ततत्प्रसादतः तस्माद्गृहंतदाभोक्ष्ये
यदाद्रक्ष्यामिनाशिवाम् ३५ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येललितोपाख्यान
द्वाविंशोऽध्यायः २२ ऋ सूतउवाच इत्युक्तानिर्गतस्तस्माद्गृहादकृतभोजनः तद्भार्याचिंतयाविष्टा
स्थापितस्थावनस्थती १ भुक्तवत्सुब्राह्मणेषुश्रीपतिःपर्यपृच्छत कुगतोगोपतिरिति तच्छ्रुत्वासोपिदुःखितः २ गो
पतिस्तुसरिद्दुर्गवनानिबहुशोभ्रमन् अपृच्छत्पथिकान्मार्गेनदेव्याःपदमभ्यगात् ३ पंचमेवासरेप्राप्तंक्षुत्पिपासार्दितो
४ अलब्धदर्शनोदेव्यादुःखितोनिपपातह ४ तंकृच्छ्रगतमालोक्यभवानीभक्तवत्सला कृतापराधमपितमनुज
ग्राहवैतदा ५ गतमूर्छंसमुत्थायदिगंतानवलोकयन् ददर्शपुरतोगोपंचारयंतंगवांगणम् ६ तंदृष्वाकिंचिदा-

स्वस्ययथौतस्यांतिकंशनैः अपृच्छत्कोभवानास्तेकुत्रत्यः कुतआगतः ७ कोपंदेशःकवासोस्तिकिंपुरंनामबलव
निशम्यवचनंतस्यवक्तुंगोपःप्रचक्रमे ८ गोपउवाच उपागनामनगरमुपागोनामभूपतिः उपांगललितादेव्यावि
द्यतेतत्रमंदिरम् ९ तत्रत्योहमदूरेणत्यागतोगोधनैःसह इत्याकर्ण्यवचस्तस्यविप्रः संमुदितोभवत् १० सगोप
सहितःसोपिविवरप्रविवेशह दूराद्ददर्शभुवनपुरमध्यतपोधनाः ११ उपांगललितादेव्याःस्फटिकगगनालिहन् सौ
वर्णनविचित्रेणकलशेनोपशोभितम् १२ यथोदयाचलशीर्णदधानभानुमंडलम् त्वरितोगोपमामंत्र्यप्रासादसय
योमुदा १३ प्रणम्यदंडवत्क्षिप्र कृतांजलिपुटस्थितः उपांगललितादेवीमनस्तोतुमचक्रमे १४ गोपतिरुवा
च नमस्तुभ्यंजगद्धात्रिभक्तानाहितकारिणि जगद्धीतिविनाशिन्यैसर्वमंगलमूर्तये १५ हत्यानिशुंभमहिषप्र
भृतीन्सुरारीनिंद्रादयोनिजपदेषुययाभिषिक्ताः लोकेत्ययाचनगृहीतसमावतारेमातःप्रसीदवरदेकुरुमेनुकपाम्
१६ त्वामुक्त्येमुनिजनाः कुटिलीकृतांगीदेवींनिजेवपुषिकुंडलिनीभजंति भक्त्यैवदेविमनुजाः कनकारविंदबद्धास
नामविरनंकमलास्तवंति १७ सापराधोस्मिशरणं प्राप्तस्त्वाजगदंबिके इदानीमनुकंप्योहंयद्दृष्ट्यासिकरोमितत् १८
इतिस्तुत्वाथशर्वाणींप्रणम्यचपुनःपुनः कृतसंध्याविधिस्तत्रशेतेस्माकृतभोजनः १९ स्वमेमूर्तिमयीदेवीविप्रमेचस
मादिशत् गोपतेवत्सतुष्टाहंगच्छोपांगमहीपतिम् २० तत्पूजनकरंडस्ययाचयस्वविधानकम् तत्पूजयनिजगृहे परा
मृद्धिमवाप्स्यसि २१ स्वप्नइत्यात्मसंदेशोजल्पेगोपतिस्तदा राजदर्शनवेलायांप्रभातेविमलेसति २२ सप्रविष्टोनृप-
सभांप्रनीहारनिवेदितः राज्ञासंभाषितस्तत्रविषसादासनेशुभे २३ पृष्टश्चागमनेहेतुंययाचेनृपतिंतदा देव्यर्चनकर
डस्यपिधानंदेहिमेनृप २४ इत्यर्थितःसविप्रेणजातादेशोप्यदारणात् पिधानकनमस्कृत्यतस्मैवासोधनानिच २५ आ
शीर्भिरभिनंद्यायतमामंत्र्यसभूमिपम् उपांगललितादेव्याःप्रासादपुनरागमत् २६ ललितांप्रणिपत्याथत्वरितोनिर्ययौ

बिलात् समीपेस्वपुरंदृष्ट्वातद्गेगृहमुपागमत् २७ रुदद्भिः सहसंगम्यसर्वंतत्कथयन्मुदा पूजयित्वापिधानंतद्वि
दधेपारणंमुदा २८ एवमाराधयन्सोपिससमृद्धोभवत्पुनः सोपितत्रसमारेभेद्विजाय्योबहुवासरम् २९ एकातस्या
भवत्कन्याललितानामसुंदरी सातत्पिधानमादायविहर्तुयातिसर्वदा ३० प्रमादत्वात्प्रियत्वाच्चपितृभ्यामनिवारि-
ता ३१ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेऽश्विनमाहात्म्येललितोपाख्यानेत्रयोविंशोऽध्यायः २३

ऋ नारदउवाच कदाचित्सावयस्याभिःसाकंगाजलेशुचौ क्रीडतीदृशेनोयेनीयमानंकलेवरम्
१ सापिधानेननसिंचंतीत्यन्याश्चाजलिनातदा तत्पिधानप्रभावेनसमुत्तस्थौकलेवरम् २ ससर्पदष्टउत्तस्थौततो
देव्याःप्रसादतः ललितानाद्विजंदृष्ट्वामनसाचकमेपतिम् ३ जुहावाभ्यवहारायजनकस्यनिकेतने मार्गेचपरिपप्रच्छ
कुलशीलादिनस्यसा ४ सोपिसर्वंसमाचख्यौगुणराशीतिनामच ललितानामत्रयामासगुणराशीतिनामच ललि-
तामत्रयामासगुणराशिमितिद्विजम् ५ परिविष्टेषुचान्नेषुपितुर्मेवेश्मनिद्विज गृहीत्वापोशनेभुक्त्वा भार्यार्थंमांत्वम-
र्थय ६ मयानुमोदितःस्नातः समातुभ्यंप्रदास्यति यथोक्तगुणराशिस्कृतथासर्वंचकारच ७ गोपतिर्भार्यया सा-
र्द्धंसमालोच्यचबांधवैः परीक्षितायविप्रायविद्यया कुलशीलया ८ प्रतिजज्ञेततःकन्यांललितांगुणराशये शुभे-
मुहूर्तेचतयोर्विवाहंकृतवान्प्रभुः ९ वरायब्राह्मणेभ्यश्चददौबहुधनंमुदा विदधेचतयोर्गेहंनातिदूरेचवश्मनः १०
तत्रोषतुःसानुरागौमित्स्यौदंपतीचिरम् विधानंचतयानीतंनिजंललितयासह ११ शनैस्कृतघ्नंसर्वंगोपतेरगमद्गृहा
त् गुणराशिर्धनीजातोमहादेव्याःप्रसादतः १२ तत्पिधानकरंडस्यजनन्याबहुवासरम् याचितापिनवैप्रादाल्लो-
तापूजनंगृहे १३ अथसागोपतेर्जायातस्येवानर्चनाद्गृहम् चिन्तंचसमचिंत्यार्थंजामातरमघातयत् १४ समिधार्थं
वनंयातंचयंतद्गृहमाययौ शोचंतीललितांकन्यांसनुदेव्याः प्रसादतः १५ उत्थापविपिनादेत्यभुक्त्वाशेतेस्करंगृहे

पादसंवाहनंतस्यकुरुतेललितानघा १६ तंदृष्वादुःखिनाभूमौप्रणिपत्यमुहुर्मुहुः ललिताकृत्स्नतत्पृष्टानिजमाहत्यपा-
नकम् १७ गुणराशिस्तदातस्यैप्रायश्चित्तंददौबहु आत्मनोबहुकालेनकृच्छ्रादभिपुनाद्भुवः १८ श्रीपतेश्चलालक्ष्मी
समालोक्यतपोधनाः गोपतिस्तमथापृच्छत्तातत्ववर्तसेकुथम् १९ किमाचरसिकल्याणंयेनश्रीश्चलात्वयि इतित-
स्यवचःश्रुत्वाश्रीपतिर्विस्मितःपुनः २० अस्माभिस्तहूतंदेव्यायत्कृतंगुरुमंदिरे तद्विस्मृतत्वयासर्वंतेनश्रीस्तेक्षयग
ता २१ उपागललितादेव्याव्रतंकुरुपुनःशुभम् सोपिभक्त्याव्रतंचक्रेपुनर्भात्रोपदेशितम् २२ लेभेचपरमामृद्धिंपुत्रां
श्चबहूधानथा उपागललितादेव्याःकुर्वन्नारायणंभुवि २३ कृतमन्यैश्चबहुभिस्तैस्तुलब्धा मनोरथाः विधानंतस्यव
क्ष्यामितच्छृणुध्वंतपोधनाः २४ शुक्लपक्षेतुपंचम्यामिषेमासिचरद्व्रतम् गर्जतिसंध्ययोस्त्याज्येदिनवृद्धिक्षयव-
गताः २५ निर्वृत्यावश्यकंकर्मशुचिरागौविवर्जितो चत्वारिंशत्तथाचाष्टौकल्पितानिविधानतः २६ दंतकाष्ठान्युपादा
यतडागंवानदींव्रजेत् दंतधावनपूर्वाणिमज्जनानिसमाचरेत् २७ ततोयथाविधिस्नात्वाशुक्लवासाग्रहंव्रजेत्
ततोमंडपिकांकृत्वाशुचौदेशेमनोरमाम् २८ सौवर्णींप्रतिमांकृत्वाशुचौदेशेमनोरमां उपचारैःषोडशभिरभिमंत्रैः
समाहिताः २९ ततोजागरणंकृत्वागीतवाद्यपुरःसरम् नामचोगुरवेदद्यान्निशिवास्याद्विसर्जनम् ३० व्रतमेवतुयः
कुर्यात्सुत्रवान्धनवान्भवेत् विद्यावान्रोगनिर्मुक्तःसुखीभोगीचजायते ३१ अवैधव्यंचलभतेस्त्रीकन्यावरमुत्तम
विजयंपुष्टिमारोग्यंवांछितार्थंप्रयच्छति ३२ इत्येत द्व्रतमाख्यातंसेतिहासमहर्षयः शृण्वन्यश्च नरोनारी-
क्त्येवसुखमाप्नुयात् ३३ नारदउवाच इत्येतत्कथितंसर्वंललिताव्रतमुत्तमम् येकुर्वंतिसदाभक्त्यानतेनि
रयगामिनः ३४ इतिश्रीभविष्योत्तरपुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येचतुर्विंशोऽध्यायः २४

२१

२५ नारदउवाच अथापरंवदिष्यामिदशांगललिताव्रतम् यत्पूर्वंयज्ञरूपायकृष्णायामिततेजसे १

पप्रच्छकुंतीतनय श्चिंताकुलितमानसः युधिष्ठिरउवाच देवदेवजगन्नाथलक्ष्मीप्रियजनार्दन २ कथयस्वकरम्भेः
षदशांगललिताव्रतम् कृतएवसमुत्पन्नाकस्मात्पूज्यतमाभुवि ३ पूजिताकाफलप्राप्तिःकथयस्वममप्रभो श्रीकृष्णउवा
च पुरात्रेतायुगेपार्थजातोदशरथोमहान् ४ तस्यभार्याचकौसल्याऽपुत्रासापतिव्रता सर्वाभामवनेकश्चिदेकशृंगोमुनि
दा ५ स्वागतंचकृतंराज्ञासोपविष्टोवरासने तेनराजामुनिश्रेष्ठोवस्त्रालंकारभूषणैः ६ पूजितःपराभक्त्यातुष्टोमुनि
रोब्रवीत् मुनिरुवाच तुष्टोहंनवराजेंद्रभार्ययासहितायते ७ सौभाग्यंचवरंब्रूहिकिंतेभीष्टंददामितत् रा
जोवाच यदितुष्टोसिमेतातत्पुत्रोहमृषीश्वर ८ नीर्यूंवाव्रतमेकंवानद्वदस्वमहामुने ऋषिरुवाच शृ
णुराजन्नवहितोव्रतानामुत्तमव्रतम् ९ कर्तव्यंपुत्रकामार्थंसौभाग्यादिकरंनृप रोहिणीनामचंद्रस्यभार्यापूज्या
प्रयत्नतः १० सानुष्टापुत्रपौत्रांश्चनवदास्यतिपार्थिव दशरथउवाच कस्मिन्मासेतुसपूज्यानिशोकस्यांवद
प्रभो ११ ऋषिरुवाच आश्विनेचसितेपक्षेदशम्यांप्रयतःशुचिः सौवर्णीकारयेद्देवीं पूजयेत्कुसुमैःशुभैः १२
दिनानिदशसंपूज्याचतुर्थ्यांतुसमापयेत् कूष्माडमातुलिंगादिफलैर्दशविधैर्नृप १३ गंधपुष्पैर्धूपदीपनैवेद्यैर्दशभिर्नृ
प अर्घ्यैश्चदशसंख्याकैर्वायनैर्दशभिस्तथा १४ प्रदक्षिणानमस्कारैर्दशभिर्दशभिर्नृप ततोमंगलवाद्यादिगीतनृत्या
दिकारयेत् १५ चंद्रोदयेतुसंप्राप्तेअर्घ्यंनैवेद्यमेवच शंखेतोयंसमादायसपुष्पफलसंयुतम् १६ जानुभ्यामवनीस्पृ
श्यचंद्रायार्घ्यंनिवेदयेत् पंचरत्नसमायुक्तंदशपुष्पफलैर्युतम् १७ मूर्ध्निस्थितेनपात्रेणचंद्रायार्घ्यंनिवेदयेत् नमस्ते
देवदेवेशिरोहिणीसर्वकामदे १८ सोमेनसहितेदेविगृहाणार्घ्यंनमोस्तुते एतद्व्रतंनृपश्रेष्ठ दशवर्षाणिकारयेत् १९ उद्या
पनंततःकुर्याद्दशवारंतुभक्तितः स्वशाखोक्तविधानेनत्वधिवासनपूर्वकम् २० ऋत्विजोदशसंख्यातानेकमाचार्यमेवच
दशसंपाद्यकलशान्सुगंधतोयपूरितान् २१ सवस्त्रासहिरण्यांश्चब्राह्मणायनिवेदयेत् अशक्तोदशवर्षांतेएकनोद्यापं

नंचरेत् २२ सौवर्णीरोहिणीकार्यावंद्रस्तुरजनस्यच अष्टांगुलः शशीप्रोक्तोरोहिणीचतुरंगुला २३ गृहीत्वाकांस्यपात्रे
तुसोमेनसहितान्यसेत् पुष्पमंडपिकामध्येस्थापयेच्चविधानतः २४ पूर्वोक्तेनविधानेनस्थापयेल्लितांततः आचार्यं-
वरयेत्सूर्ववेदशास्त्रविशारदम् २५ रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः प्रभातेतुपुनःपूजांततोहोमंसमाचरेत् २६
दूर्वाष्टशतकंहुत्वापंचस्वाद्यंतथैवच गौरीर्मिमेनिमंत्रेणदूर्वाहोमंसमाचरेत् २७ नमोव्यंतिमंत्रेणसघृतपंचखाद्य
कं पीठसोपस्करंचैवत्याचार्यायनिवेदयेत् २८ युग्मानिदशसंपूज्यवस्त्रालंकारभूषणैः गोदानदक्षिणांदद्याद्घृतसपू
र्णंहेतवे २९ एवंयः कुरुतेभक्त्याधनपुत्रानवाप्नुयात् सौभाग्यपुत्रसंपत्तिप्रवैधव्यंपतिव्रता ३० ऋष्यशृंगप्रसादेनप्राप
पुत्रंचनृपः शृणुष्वत्वयदाख्यानपुरावृत्तंनराधिप ३१ स्कमतिर्ब्राह्मणःकश्चित्तस्यभार्यादयावती दयावत्यासमपुत्राःसु
नदाकन्यकाभवत् ३२ स्कमतेर्दुहितराजन्स्त्रीचिन्हादशवार्षिकी पितादद्यौद्विजेंद्रायशमीकार्यद्विजन्मने ३३ ब्राह्मेण
विधिनाराजन्विवाहस्तत्कृतस्तयोः लाजाहोमेसमारब्धेसमिधातर्गतःफणी ३४ दंशंकृत्वाशमीकस्यतत्क्षणात्पतिता-
भुवि सुनंदावामभागेतुमृतंदृष्वारुरोदह ३५ ततःसुनंदादुःखेनमूर्छयापतिताभुवि रुरुदुश्चजनाःसर्वेस्कमतिर्भार्ययास
ह ३६ तत्रराजादशरथःसात्वपूर्वमिदंवचः मृत्यूसर्वस्यनियतोरोदनेननगच्छति ३७ तस्मान्नरोदितव्यंहिक्रियाकार्या-
स्वशक्तितः ततःशवंस्मशानेतुअग्नियोज्यंशवस्यतु ३८ एतस्मिन्नंतरेतत्रवाणीचाकाशसंभवा एववेत्थमहाभागाःशमि-
कोजीवयिष्यति ३९ उपायस्तंशिवेनोक्तःकैलासेगौरिजांप्रति तंशृणुध्वमहाभागाः कथयामिसमाहितः ४० मात्राकृतंद-
शरथललिताव्रतमादरात् तस्यव्रतस्ययत्पुण्यंदुहित्रेयंदिदास्यति ४१ तेनपुण्येनभर्तास्याजीवयिष्यतिवैध्रुवम् श्रुत्वाचा
काशवाणींतुमातापुण्यददौतदा ४२ तेनदत्तेनपुण्येनशमीकोजीवितस्तदा राजासर्वजनैःसार्द्धंस्मशानात्स्वगृहययौ
४३ जामातातुशमीकोपिस्वग्रामप्रययौमुदा विवेशुःस्वान्गृहान्सर्वेसाधुसाध्वीतिचाब्रवन् ४४ नारदउवाच इत्याख्या

नंपुरावृत्तंभृशमाश्चर्यकारकं दशांगललितारव्यानंभक्त्यायःशृणुनेनरः ४५ इतिश्रीभ० आश्वि० दशरथललिताव्रतनिरूपणनामपंचविंशोऽध्यायः २५ ७ नारदउवाच शृणुराजन्प्रवक्ष्यामिएकादश्याःकथानकं यत्पूर्वंऋषयःसर्वेनैमिषारण्यवासिनः १ प्रणम्यसूतंविधिवत्पृच्छुःपरमादरात् ऋषयऊचुः सर्वविद्यानिधेःसूतश्रुतं तद्वचनामृतम् २ शुक्लाश्विनस्यमासस्यकथयस्वहरिप्रियाम् सूतउवाच शृण्वंतुऋषयःसर्वेधर्मायकथितपुरा ३ पृच्छतश्चोपकारायसर्वकामफलप्रदं श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिएकादश्याविधिंशुभम् ४ दशम्याप्रातरुत्थायविधिवत्स्नानमाचरेत् कृत्वानित्यविधिंपश्चात्पूजयेत्पुरुषोत्तमम् ५ रमायुतस्वर्णमयंपूजयेद्धिजितेंद्रियः संप्रार्थ्यदेवदेवेशंव्रतसिद्धिंकुरुष्वमे ६ एकादश्यामपितथापूजयेद्रमयायुत कमलैःकेतकीपत्रैर्धात्रीपत्रैस्तथादलैः ७ कुंदैश्चमुनिपुष्पैश्चतुलस्याःकोमलैर्दलैः पूजयेत्परमात्मानंसंप्रार्थ्यचपुनःपुनः ८ एकादशीव्रतंदेवनिर्विघ्नंकुरुमाधव सहस्रतुलसीपत्रैर्बिल्वपत्रैस्तिलैर्यवैः ९ पूजयेत्परयाभक्त्याफलैर्नानाविधैस्तथा रात्रौपूजापुनःकार्याजागरंहरिसन्निधौ १० तच्चरित्रैः पुराणैश्चगीतनृत्यस्तवादिभिः हादश्यांचतथाकुर्यात्पूजनंपरमात्मनः ११ द्वादश्यांचैवभोक्तव्यंब्राह्मणैःसहचोत्तमम् द्वादश्यांनियमान्कृत्वाव्रतपूर्णफललभेत् १२ एवव्रतंप्रकर्तव्यंशूद्रविट्क्षत्रब्राह्मणैः स्त्रीभिश्चैवप्रकर्तव्यंव्रतंश्रीहरितुष्टये १३ गुर्विणीभिःप्रसूताभिर्बालवृद्धातुरैर्विना क्षुधायुतैरशक्तैश्चकार्यांतरवशैरपि १४ ब्राह्मणेभ्यःप्रकर्तव्यंदक्षिणाभिःसंतोषयेत् व्रतस्यफलमाप्नोतिनान्यकार्याविचारणा १५ द्वादश्यांदानयोगेनविष्णोःप्रीतिपरोभवेत् उदकुंभंघृतंस्वर्णंतिलाश्चोपानहौपयः १६ कुष्मांडमातुलिंगंचदानात्पूर्णफलंलभेत् शालग्रामशिलादानान्नपुनर्जन्मभाग्भवेत् १७ शालग्रामंत्रयंविष्णुंसर्वदेवस्वरूपवान् ययध्यायतेवैतत्रससदैवाक्षिगोचरः १८ द्वादश्यामस्यदानेनस्वयंविष्णुःप्रसीदति तस्माद्व्रतंप्रकर्तव्यंपूज्योभगवतिनिश्चितं १९ अज्ञानतःकृतेनापिचैकुंठंलभतेसुखम् अत्रार्थेकथयिष्यामिइतिहासंपुरातनं २० पुरासीत्भानुनगरेब्राह्मणोगौतमाभिधः पत्नीपुत्र

विहीनश्चजातोदैवेनपर्यटन् २१ ग्रामात्ग्रामांतरंगच्छन्भुंजन्भुंजन्गृहेगृहे सर्वकर्मपरिभ्रष्टोदारिद्र्येनापिपीडितः २२ यदृच्छयागतःकाचिच्छुभावैष्णवपालिताम् भ्रमत्प्रतिग्रहेविप्र मध्यान्हसमुपागतः २३ भिक्षादेहिस्तुधायुक्तंद्विजंज्ञात्वाद्विजोत्तम तेप्येननैवनैवेतिभिक्षाचैकादशीदिने २४ नदातव्यंनभोक्तव्यमेकादश्यांकदाचन निवारितोपिहिपुनर्दैहिदेहिवदन्मुहुः२५ नलब्ध्वाहिदिवातेनविनिद्रःक्षुधयाभवत् रात्रौस्मरन्हृषीकेशंप्रभातेव्याकुलोभवत् २६ तस्मिन्वसरेदत्तंवैष्णवेनफलंकरे तद्गृहीत्वाददौतस्मैत्यनेनप्रीयतांहरिः २७ फलाशभक्षयन्किंचिज्जहौप्राणान्हरिंस्मरन् दिव्यरूपःसमभवद्विष्णुदत्तादिभिर्वृतः २८ दिव्यंविमानमारुत्यवैकुंठंसजगामह अतोनरेणकर्तव्यमाश्विनेकादशीव्रतम् २९ इतिश्रीभ॰ आश्विनमा॰ एकादशीव्रतकथननामषड्विंशोऽध्यायः २६ ४ नारदउवाच त्रयोदश्यांमहाभागत्र्यशोकत्रिदिनव्रतं कथयामिविशेषेणसीताशोकहरंपरम् १ शोकाकुलेनधर्मेणदग्धानंदवकीसुत प्रणम्यपृष्ठवान्देवव्रतशोकहरंपरम् २ श्रुत्वैवकृपयादेवोमाधवोवाक्यमब्रवीत् कृष्णउ॰ शृणुराजन्प्रवक्ष्यामित्र्योध्यायाव्रतमहत् ३ वसिष्ठेनमुनींद्रेणसीता ।:सन्निवेदितम् विधायरावणवधंयदारामःपुरेभ्यगात् ४ तदादेवीप्रणम्याथवसिष्ठंवाक्यमब्रवीत् सीतोवाच भगवन्दंडकारण्येरावणेनहृतापुरा ५ नजानामितदाकिंचिदात्मीयंविकलेंद्रिया मासदशोषितातत्रराक्षसेनहृतासती ६ अशोकवृक्षप्रणताविशोकात्वंभविष्यसि तथेत्युक्तंमयाब्रह्मन्यथोक्तंत्रिकुटाचल ७ ततःप्रभृत्यहंशश्वदशोकव्रतमारभेत् तेनव्रतप्रभावेनहनुमान्पवनात्मजः ८ शतयोजनविस्तीर्णंतीर्त्वासागरमव्ययम् मयादिष्टानृपश्रेष्ठसोभिजातोमहाबलः ९ पुनश्चकुशलीजातोदग्ध्वालंकांमहाबलात् ततोमेप्रत्ययोजातोव्रतस्यास्यमहामते १० अस्यचव्रतराजस्यप्रभावेनाभयोहरिः ततःकैश्चिद्दिनैर्भर्तामेराघवोबली ११ निहत्यरावणंसंख्येमांविशुद्धांगृहीतवान् तदहंभगवन्ब्रह्मन्पृच्छामित्वांदृढव्रत १२ अशोकस्यप्रभावंमेवक्तुमर्हस्यशेषतः व्रतस्यतस्यपुण्यंतुपुराणोक्तंमहीतले १३ अथवास्करलोकेषुस्करनारीनिषेवितम्

वसिष्ठउवाच एवन्मेनज्जनकजेयथावदसिस्कव्रते १४ अशोकस्यप्रभावेननदेवासमयाधुना शृणुचात्रमयाख्यातंनंद
नेदिव्यकानने १५ बृहस्पतिमुखाच्छुत्वायज्ञातंपरमाद्भुतं वृत्राभिभूतोमघेणहतोदेवान्महास्करः १६ विस्मसत्वाब्रूहिहो
निर्यस्यधर्मेणजायते ब्रह्महत्यामवाप्याथदेवेंद्रोनष्टचेतनः १७ त्रैलोक्यराज्यंत्यक्तुममज्जारिभयार्दितः एतस्मिन्नंतरे
देविनहुषोनृपसत्तमः १८ त्रैलोक्यराज्यसकलंजहारबरदर्पितः ततःशचीप्रव्यथितात्ततराज्यमवेक्ष्यसा १९ नदनांतरमासा-
द्यतपस्तेपेसुदुष्करम् तांदृष्ट्वाधर्मनिरताबृहस्पतिरुदारधीः २० आगत्यनंदनंदेवीवाक्यमाहमहातपाः बृहस्पतिरु० किं
मर्थंतप्यसेदेवीतपःपरमदुश्चरं २१ त्वयायत्क्रियतेदेवीनपसोब्रूहिकारणं शच्युवा० हताभिभूतदेवेंद्रत्ततराज्यंहतहिज
२२ कृप्रनष्टचतंविप्रनजानेहमियादिनि क्वनिष्ठनिमुनेब्रूहिस्करात्शत्रुनापनः २३ प्रसादकुरुमेदेवसंयोगंतेनचाप्नुयाम्
वाक्पतिरु० शृणुपौलोमिदेवेंद्रोयथानष्टोभयातुरः २४ मानसाभसिसंभूतपंकजांतरमाश्रितः बृहत्त्याग्रभावेनउद्वेगगु
रुमाश्रितः २५ अभिभूतमिवायस्यंततोप्सुनिलयंगतः कामतपःप्रत्ययेनसर्वप्राप्स्यसिसुव्रते २६ बहूकामोप्सितंयस्मा-
त्तपसालभ्यतेफलं स्त्रीणांपुष्टिकरत्वेकव्रतप्रोक्तस्वयंभुवा २७ सावित्र्यापृच्छ्यमानायास्तत्त्वंकर्तुमिहार्हसि अशोकव्रत-
मित्येवनाम्नाख्यातंत्रिविष्टपे २८ येनचीर्णेनपौलोमिनारीदुःखंनसंस्मरेत् हरस्यंभुवोत्येवृक्षराजसनंदने २९ अस्मिंस्तु
देहरेस्तुष्टिरितिजानामिनिश्चितम् ३० इतिश्रीभ० आश्विनमा० अशोकाख्यानेसप्तविंशतितमोऽध्यायः २७ ७
शच्युवाच पुन्नागनागबकुलचंपकाद्यान्महीरुहान् परित्यज्यकथंचान्यान्रोस्मिकृतसन्निधिः १ बृहस्पतिरु० हरेण
निर्मितपूर्वमशोकाख्यव्रतशुभं लोकोपकारकरणेततोयंशिववल्लभः २ वसिष्ठउ० निर्मायवृक्षप्रवरंप्रणम्यभक्त्यार्चयि-
त्वाविधिवच्चधर्मं पप्रच्छदेवीपुनराहनाम्नादेवि शृणुत्वंविधिमस्यसर्वं ३ वाक्पतिरु० आरभ्यतद्व्रतकार्यात्रिरात्रसमुपो-
षां त्रिरात्रंदेविविख्यातमशोकतरुमूलके ४ कार्यनारीभिरमलमनोवाक्कायकर्मभिः ततःप्रदक्षिणादेवित्यष्टोत्तरशतंफलैः

५ नारिकेलैश्चखर्जूरैर्गोस्तनीभिर्दिनेदिने मंत्रेणानेनमनसापूजयंतिसदाशिवम् ६ अशोकशोकापनुदत्सर्वकामफलप्रद व्रतेनानेनचीर्णेनयथोक्तफलदोभव ७ ततस्तृतीयदिवसेसमभ्यर्च्यविधानतः महादेवंवृषयुतंवशपात्राणिकारयेत् ८ अनेनैवविधानेनयाकुर्याद्व्रतमुत्तम वैधव्यंनामयानारीपुत्रसौख्ययुताभवेत् ९ वसिष्ठउवाच बृहस्पतिमुखाच्छ्रुत्वा शचीचक्रेव्रतंशुभ शास्त्रोक्तविधिनासीतेभक्त्यादेवःसमागतः १० वृत्रहत्याविनिर्मुक्त स्तयातवापिवाञ्छितं व्रतमेतत्समाचर्य यासाध्वीचैवसुधीः ११ प्राधान्यंजायतेक्षिप्रंलोकेख्यातिर्भविष्यति व्रतमेतदशोकस्यसर्वकामफलप्रद १२ श्रीकृष्णउ॰ वसिष्ठस्यवचःश्रुत्वासीताचक्रेव्रतोत्तम रामाज्ञांसमनुप्राप्यत्वयोध्यायांचकारसा १३ सीताव्रतेकृतेतस्मिन्दुःखहीनाभवत्तदा युधिष्ठिरउ॰ अशोकस्यसमाख्यातापूजादेवविधानतः १४ कादेवतातत्रपूजानारीभिर्व्रतसिद्धये श्रीकृष्णउ॰ अशोकवृक्षेतिष्ठंतिसर्वदेवापुधिष्ठिर १५ पल्लवेषुचशारदासुशिवायाः सर्वदेवताः अशोकसंज्ञोरामःपूजनीयःसलक्ष्मणः १६ सीतयासहितोराजन्विष्णुरीशोयतोमतः पृथक्मंत्रैःपृथक्स्नानैरशोकाख्यायथाक्रम १७ राज्यश्चभरतश्रेष्ठपुराणोक्तविनतः अशोकवृक्षविहिताःशिवाद्यायेसुरोत्तमाः १८ अशोकपूजनेनापिसंतुष्टामेभवत्विह गौरीलक्ष्म्यातथेद्राण्याअरुंधत्यासीतया १९ त्वंसमाराधितःपूर्वमशोकफलदोभव अशोकवाटिकायांतेसीतातिष्ठत्स्वभावतः २० गृहाणार्घ्यंमयादत्तंसलक्ष्मणसंयुतः अग्रजसन्मुखंवीरवनेयोनुययौतदा २१ सुलक्ष्मीवर्धनगौरीलक्ष्मणपूजयाम्यह अवनीतलसंभूतेतस्ववर्णसुदरि २२ गृहाणार्घ्यमयादत्तंपूजाजनकनंदिनि लक्ष्मीस्त्वंसर्वदेवस्यविष्णोरशोमहीतले २३ अवतीर्णामयादत्तंगृहाणार्घ्यंनमोस्तुते एवंसपूज्यविधिनासर्वशोकविनाशकृत् २४ सर्वपापप्रशमनंसर्वकीर्तिविवर्द्धनम् अपुत्रयापुरापार्थपार्वत्यामंत्र॰

च॰ २५ अशोकशोकशमनंपुत्रत्वेपरिकल्पितः जातकर्मादिकृतस्त्यशोकस्यमहातरोः २६ कारितंविधिवत्तत्रतेनवृक्षोशिलोत्तम यात्रतंकुरुतेनारीपुराणोक्तविधानतः २७ अशोकस्यप्रसादेनसर्वान्कामानवाप्नुयात् सर्वोपहारान्राजेंद्रब्राह्मणायनिवेदयेत्

२८ कथामपिसमाकर्ण्ययः कुर्याद्द्विजतर्पणम् ततःसफलमाप्नोतिन्त्रवतोस्मिन्नसंशयः २९ युधिष्ठिरउ० विशेषंब्रू
हिमेदेवत्रशोकतरुपूजने येनार्चितेतरोसर्वप्राप्यतेसफलंफल ३० श्रीकृष्णउ० कथयामितरोराजन्याभिव्रतमिदंकृतम्
मनुष्यदेवगंधर्वनारीभिःपुत्रसिद्धये ३१ अनुसूयाभिपत्नीत्रत्रुरुधत्यातथैवच देवक्यासीतयाचैवद्रौपद्याचद्रभामया ३२
दमयत्याचसावित्र्याकृतन्द्रुतमुत्तमम् अशोकःपूजितःपूर्वंयथावच्छ्रुणुपार्थिव ३३ अशोकोराजतश्चैवस्फवर्णस्यतथा
शिवः तथैवकार्यौसीतासौवर्णौरामलक्ष्मणौ ३४ पूजयेद्विविधैर्मन्त्रैःपूर्वोक्तैर्नृपसत्तम अशोकपूजयेद्वृक्षंप्ररूढशु
भपल्लवैः ३५ विरूढैःसप्तधान्यैश्चगुणकैर्मोदकैःशुभैः कालोद्भवैःशुभैर्दिव्यैर्नारिकेलैःसदाडिमैः ३६ पुष्पादिनात्या-
धूपैःपूजयेत्तरुमुत्तम अशोकपांडवश्रेष्ठशोकनाशनपापहन् ३७ पितृमातृपतीनांचश्वशुराणांतथैवच अशोकत्वशोक
हरोभवसर्वत्रनःकुले ३८ इतिश्रीभ० पृथुनारदसं० आश्विन० अशोकत्रिरात्रव्रतनिरूपणंनामाष्टाविंशतितमोऽध्यायः
२९ ॐ नारदउवाच पौर्णमास्यांविशेषेणकुर्यात्कोजागरव्रतम् महालक्ष्मींसमभ्यर्च्यप्रदोषेभक्तिपूर्वक १
उपचारैरनेकैश्चपायसेनमधुसंयुतैः दिक्पालान्पूरितःपूज्यइंद्रमैरावतस्थितं २ ब्राह्मणान्पूजयेत्पश्चाद्धमाल्योपहारतः ना
रिकेलोदकंपीत्वाअक्षक्रीडासमाचरेत् ३ चंद्रिकायांतुसंस्थाप्यक्षीरभक्तिपुरःसरम् निशीथेवरदालक्ष्मीःकोजागर्तीतिभा
षिणी ४ जगत्समभ्येत्यदास्यामिलोकन्चेष्टाविलोकिनी तस्मैवित्तप्रदास्यामियोजागर्तिमहीतले ५ सर्वथैवप्रकर्तव्यंव्रतंदा
रिद्र्यभीरुभिः अत्रतेकथयिष्यामिइतिहासंपुरातनम् ६ मागधेबलितोनामब्राह्मणःकुंभसंभवः नानाविधाप्रवीणो-
सौसंध्यास्नानपरायणः ७ याचनमरणंतुल्यमन्यतेऽसौद्विजोत्तमः ग्रहागतंसगृण्हातियोवान्ययाचयेत्कचित् ८ तस्य-
भार्यामहाचंडीनित्यंकलहकारिणी मद्यगन्यःस्वर्णरूप्यालंकारादिविभूषिताः ९ नानामाल्यांबरधरापश्यद्देवांगनाइव
अहंदरिद्रस्यगृहेपतितास्मिदुरात्मनः १० लज्जामांबाधतेनित्यंज्ञातीनामुखदर्शने धिगस्तुतवविद्याधानिर्धनस्यकुलस्यच

११ एवंवदतिलोकेषुनकरोतिपतीरितम् संकल्पंकृतवत्येकंभाविपत्तद्भविष्यति १२ विपरीतंकरिष्यामियावल्लक्ष्मीःप्र-
सीदति भर्तःपाषाणबुद्ध्यंचौर्येकुरुनृपालये १३ आनीयताधनभूरिनोचेत्तताडयाम्यहम् क्षणरोदितिनाम्नातिकदाचिद्ह
दुखादति १४ साकपालंताडयतित्येवक्लेशयतेपतिं दृष्वातस्यास्तुचरितंयाचनादुःखभीतितः १५ नोवाचवचनंकिंचि-
द्यथालाभेनतोषितः एकस्मिन्श्राद्धकालेतुत्युद्विग्नोभूद्विजोत्तमः १६ एकस्मिंवत्सरेतत्रश्राद्धसामग्रिकंगृहे तयापिगृ
हिणीचैवनकरिष्यतिकिंचन १७ इत्युद्विग्नमनाविप्रोनभार्यातंनकिंचन चिंतयाविष्टमेवंतमाययौमित्रमुत्तम १८ नाम्नाग-
णपतिःख्यातस्तस्मिन्नभ्यागतेसति नोवाचपूर्ववद्वार्तांमित्रंवचनमब्रवीत् १९ भोभोललितचित्तेतंकिमर्थंचिंतयान्वितं अ
वश्यंस्वधियाःकृत्वाचिंतांतेनिर्हराम्यहम् २० ललितउवाच अधुनापितृपक्षेतुपितुःश्राद्धंसमागत् सामग्रिकंगृहेचास्ति-
विपरीतकरीप्रिया २१ कथंसंपाद्यतेश्राद्धमितिचिंतायुतोस्म्यहम् गणपतिरुo धन्योसिकृतकृत्योसिभार्यायस्येदृशीगृहे
२२ ह्रीहित्वंवैपरीत्येनभार्याकार्यंकरिष्यति ललितस्तुतथेत्युक्त्वासायंभार्यामभाषत २३ अनर्थकारिकेचंडिप स्वः श्राद्ध
कंपितुः कुत्यापितंधनंयस्मात्तदर्थंतैस्तुपातकैः २४ तस्मान्नार्हसिपाकृत्वंतथादुष्टंकरोषिचेत् ब्राह्मणायद्यूतकराः शौ-
चाचारविवर्जिताः २५ निमंत्र्यास्तेत्वयाभद्रेनोत्तमान्कदाचन् इतिभर्तृवचःश्रुत्वासंभारस्तुमहान्कृतः २६ निमंत्रिता-
श्चसद्विप्राः कालेपाकःकृतस्तथा विपरीतैश्चवाक्यैश्चश्राद्धसंपादितंतथा २७ पिंडदानंततः कृत्वाभार्यायैवाक्यमब्र-
वीत् विसृज्यपिंडपात्राणिक्षिपेद्गाजलेशुभे २८ पींडानीतास्तथेत्युक्त्वाशौचकूपेव्यचिक्षिपत् नश्चात्वाललितोदुःखी
बभूवाकुलिताननः २९ क्रोधाद्विनिर्गयोगेहात्संकल्पंकृतवानिति लक्ष्मीर्यदिप्रसन्नास्यात्तदान्नंभक्षयाम्यहं ३० नावत्क
दफलाहारीवनमध्येवसाम्यहं इतिसंकल्प्यविप्रोसौगहनेनिर्जनेवने ३१ एकधर्मोनदीतीरेवृक्षवल्कलधारकः विंशद्दिनानि-
न्यवसद्गतार्द्रपूर्णिमा ३२ कालीवशसमुद्भूतानागकन्याःसुलोचनाः निवसंतिवनेतस्मिन्व्रतचक्रुःसमाप्तये ३३ श्वेती-

कृतंतुस्कधयागृहंचंद्रप्रभोपमं मंडलानिविचित्राणिनानापिष्टैः कृतानिच ३४ पंचामृतानिरत्नानिदर्पणाच्छादनानिच स्थापयि
त्वेंदिरापूजा कृतानाभिःप्रयत्नतः ३५ एवंतुप्रथमोयामोबालाभिर्गमितस्तदा आरब्धंततोद्यूतंतुर्यंतास्कनलेभिरे ३६ चतुर्भि
रूक्विनाक्षाणांक्रीडनंनैवजायते तस्मान्मृग्यस्तुरीयस्तुविचार्यैवंविनिर्गताः ३७ कन्यकास्तुनदीतीरेददृशुर्ललितंद्विजम्
ज्ञात्वातंसाधुचरितंसच्चित्तंचसुखाकृतेः ३८ उचावचवचनंचारुद्विजकोसिसमागतः एह्यद्य क्रीडितुद्यूतंलक्ष्मीप्रीतिकरंपरं
३९ इत्यंतद्वचनंश्रुत्वाललितोवाक्यमब्रवीत् द्यूतेनक्षीयतेलक्ष्मीर्द्यूताद्धर्मोविनश्यति ४० मुग्धवद्वदसेकिंत्वंकथंलक्ष्मीः
प्रसीदति कन्योवाच भाससेत्वंपंडितवत्कर्मतेस्तिचमूर्खवत् ४१ ईषस्यशुक्लपूर्णायांद्यूतेलक्ष्मीःप्रसीदति द्यूतक्रीडांतु
कृत्वैवकौतुकंपश्यमंदिरे ४२ इत्युक्तासौतयानीतःक्रीडार्थंस्वस्यमंदिरे दत्वातस्मैनारिकेलजलंभक्ष्यादिकंतथा ४३ आर
ब्धंचततोद्यूतंश्रीलक्ष्मीःप्रियतामिति लापयित्वानुरत्नानिकन्याभिर्ब्राह्मणेननु ४४ कौपीनंलापितंस्वीयंताभिर्निर्जितमेव-
तत् ब्राह्मणःक्रोधसंयुक्तः किंकर्तव्यंमयाधुना ४५ उपवीतंलापयित्वाननःस्वीयंकमंडलुम् लापयित्वैवनिश्चित्यउपवी
तंललापसः ४६ नाभिर्जितंचनदृपिशरीरंलापितंस्वयम् ततोऽर्धरात्रेसंजातेलक्ष्मीनारायणावुभौ ४७ आगतौलो-
कचरितंद्रष्टुंविप्रंददर्शतुः उपवीतंबिकौपीनंचिंतयांतिकृशींकृतम् ४८ उवाचवचनंविष्णुः शृणुत्वंपद्मलोचने तवव्रतंकृ
तंविप्रःकथंजातःसचिंतकः ४९ तस्मादेनंकुरुक्षिप्रंलक्ष्मीवंतस्करोचितम् इतिविष्णुवचःश्रुत्वापद्मयासोकदाक्षतः ५०
बलान्वितहरोजातस्तत्कालेमदनोपमः ततःकामेनसंविद्धास्तास्त्रियोराजकन्यकाः ५१ विप्रायवचनंप्रोचुःशृणुविप्रतपोधन य-
द्यस्माभिर्जितत्वंचेद्भर्तास्माकंभवस्वंभो ५२ वयंत्वयाजिताश्चेच्चयथेच्छसितथाकुरु इतितद्वचनंश्रुत्वातथामन्येसचद्विजः ५३
क्रीडनात्ताजिताःकन्यागांधर्वेणविवाहिताः तासांरत्नानितांश्चापिगृहीत्वास्वगृहंययौ ५४ प्राप्तचंडीतिरस्कारान्ममेदंभाग्यमु
त्तमं तस्मात्संमानिताचंडीसापिप्रीताबभूवह ५५ चकारस्वामिनश्चाज्ञामित्थंलक्ष्मीव्रतंहिदं एवंलक्ष्मीव्रतंकृत्वासदरिद्री-

नदुःखभाक् ५६ कथांश्रुत्वाविधानेनव्रतस्यापिफलंलभेत् ५७ एतद्व्रतंप्रकर्तव्यमाश्विनस्नानतत्परैः विपुलांश्रियमाप्नोति
नात्रकार्याविचारणा ५८ इतिश्रीभविष्योत्तरपुराणेआश्विनमासमाहात्म्येएकोनत्रिंशोऽध्यायः २९ ॥ पृथुरुवाच
पुनःकथयमेब्रह्मन्माहात्म्यमाश्विनस्यतु तद्याफलश्रुतिंपुण्याकृपांकृत्वादयानिधे १ नारदउवाच शृणुताराजशार्दूलमाहा
त्म्यस्यफलश्रुतिः यांश्रुत्वामुच्यतेजंतुःपापेभ्योनात्रसंशयः २ इहलोकेसुखंसाप्यजन्मजन्मांतरेषुच तत्सर्वंनाशमायातिमास-
माहात्म्यकीर्तनात् ३ कृतेतुतपसासिद्धिस्त्रेतायांज्ञानतःफलं द्वापरेयज्ञतपसापुराणश्रवणात्कलौ ४ कलौनास्त्येवनास्त्ये
वपुराणश्रवणात्परम् ब्राह्मणक्षत्रियैर्वैश्यैःस्त्रीभिःशूद्रादिभिर्नरैः ५ प्रातःस्नानप्रकर्तव्यंपुराणश्रवणंतथा इषेमासेशु
कर्तव्यंनरैःसर्वार्थसाधकैः ६ नकरिष्यतियोमोहात्स्नानंदानंकलौनरः तेषांनिरर्थकंजन्मभर्तांऽइवस्वसंततेः ७ जन्मजन्मांतरेदी
र्घैःकुजन्मस्यापियेनराः अज्ञानतःश्रवणतोमुक्तायांतिपरांगतिं ८ अस्मिन्नर्थेपुरापृष्टःऋषिणाकमलासनः ब्रह्मोवाच शृ
णुनारदतेवक्ष्मिकथांपापहरांशुभां ९ महोदयपुरेकश्चिच्चंद्रकांतोभवन्नृपः कुबेरइवसपत्यासर्वमान्योनिथिप्रियः १० कस्मि
श्चित्समयेराजामृगयार्थंवनंगतः जघानश्वापदमृगान्मध्यान्हेद्युमणौसति ११ तृषयापीडिताःसर्वेददृशुःसरउत्तमं जगामत्वर
याराजासैनिकैःपरिवारितः १२ तस्मिन्सरोवरेदृष्ट्वाजलक्रीडारताःस्त्रियः स्त्रियऊचुः वरंत्वहीनावयंराजन्लज्जयापयसि-
स्थिताः १३ नग्नावलोकनेदोषंकथयंतिविचक्षणाः इत्यश्रुत्वावचस्तासांसंजातोमदनातुरः १४ आराद्विलोकयंतिस्मकेचिद्वृक्षंस
मुद्यताः तत्क्षणाच्छापितास्ताभिर्यूयंवृक्षाभविष्यथ १५ तदातेवृक्षतांप्राप्तामुनिपत्नीप्रकोपनः कालेनबहुनातत्रमुनयः
समुपागताः १६ दृष्ट्वासरोवरंदिव्यंवृक्षच्छायासमन्वितं कर्तुंतदाश्विनेस्नानंप्रत्यहंकर्तुमुद्यताः १७ तत्रस्नानंप्रकर्तव्यंपुराण
श्रवणंतथा तत्रैवकौतुकंजातंतच्छृणुध्वंद्विजोत्तमाः १८ तत्राश्विन्यांपौर्णिमायांप्रातःस्नात्वायथाविधि समयंश्रवणंकृत्वा-
पूजयित्वासरस्वतीं १९ ययाचवाचकंपूज्ययावद्वृत्तमितस्ततः तदानीमेवसकलायथापूर्वंस्थिताभवन् २० सराजासैनिकाः

सर्वेरुक्तवंतोब्राह्मणान्मुहुः ऋषिस्त्रीभिर्वयंशमावृक्षयोनिमुपागताः २१ मासमाहात्म्यश्रवणान्मुक्तयामोनिजंगृहम् एव मुक्तागताःसर्वेस्नानमाहात्म्यमुत्तमम् २२ कृत्वाद्विजवराःसर्वेययुर्दिव्यांपरांगतिम् सूतउवाच मासस्नानंप्रकर्तव्यं पुराणश्रवणंतथा २३ समग्रमर्धमर्द्धंवाश्लोकंश्लोकार्द्धमेववा पुराणपुस्तकंपूज्यंवाचकंपूजयेत्ततः २४ वस्त्रालंकरणैश्चा पिपूजयेदुपचारकैः पयस्विनींसवत्सांगांदद्याद्व्यासायभक्तितः २५ सर्वतस्यगृहेनेयंगीतवाद्यपुरःसरम् पदमेकाश्वमे धस्यफलंतस्मान्नसंशयः २६ स्त्रीभिःपूजाप्रकर्तव्याहरिद्राकुंकुमादिभिः व्यासेनसहगंतव्यंतीर्थयात्रासमंफलम् २७ शक्तिहीनःसमप्यंगच्छंश्चपरमादरात् पुराणश्रवणंकृत्वानपूजयतिवाचक २८ नतेनसहयोगच्छेन्नसन्मानंकरोतियः सत्तंधोबधिरोदीनोदरिद्रोजन्मजन्मनि २९ नपुराणफलंतस्यविधिहीनस्यभाषिणः तद्दिनेमधुरमश्नीयाद्यथाशक्तिद्विजैः ३० स्त्रवासिन्यःकुमारीश्चश्रभावेयुग्मभोजनम् व्यासेनसहभोक्तव्यंपुराणश्रवणेच्छुभिः ३१ इतिश्रीभविष्योत्तर पुराणेपृथुनारदसंवादेआश्विनमासमाहात्म्येफलश्रुतिवर्णननामत्रिंशोऽध्यायः ३० ७ इतिश्रीज्योतिर्विदुलाव तंसव्यंकटरामात्मजहरिकृष्णाविनिर्मितेबृहज्ज्योतिषार्णवेऽष्टमेधर्मस्कंधेचतुर्थेमासस्तबकेआश्विनमासमाहात्म्य-सप्तमंसमाप्तम् ७ श्रीसीतारामचंद्रोजयति श्रीकृष्णार्पणमस्तु श्रीरस्तुशुभम्

यह आश्विनमासमाहात्म्य मुंबईमें पं॰ श्रीधरशिवलालके प्रज्ञायुक्तज्ञानसागरछापखानामें छाप्यो॰ सं॰१९४५ शा॰१८१० चैत्रशुक्ल ११

इतिश्रीमासस्तबकेआश्विनमाहात्म्यसमाप्तम्